# SK-101 कठोपनिषत् शाङ्करभाष्योपेता

कालावधिः - होरा | अङ्काः - 25

---

## A) अधस्ताद् यथेच्छं षट् समाधत्त।। 1x6=6

1) तं ह कुमारं ..........सोऽमन्यत॥ (मन्त्रः पूर्यताम्)
2) अजीर्यताममृतानाम् ........॥ (मन्त्रः पूर्यताम्)
3) कठोपनिषदः विषयः कः?
4) बहूनामेमि प्रथमः इत्यस्य कः अर्थः ?
5) अनुपश्य यथा पूर्वे इत्यादिमन्त्रस्य किं तात्पर्यम् ?
6) द्वितीयेन वरेण नचिकेताः किम् अवृणोत् ?
7) भोगाः किं कुर्वन्ति ?
8) कस्मादन्यं वरं नचिकेता न वृणीते ?

## B) अधःस्थितेषु यथेच्छं प्रश्नचतुष्टयं भाष्यदिशा उत्तरत। 3x4=12

1) नचिकेताः पितरम् उपसृत्य मां कस्मै दास्यसीति कुतः पप्रच्छ ?
2) ब्राह्मणम् अतिथिं यः न सत्कुरुते तस्य का दशा भवेत् ?
3) स्वर्ग्यः अग्निः कुतः लोकादिरुच्यते ?
4) कठोपनिषदि प्रलोभनग्रन्थस्य क आशयः?
5) ब्रह्मजज्ञः देवः कः?
6) ये ये कामा दुर्लभाः इत्यादिमन्त्रं प्रपूर्य व्याख्यात।

## C) नीचैः दत्तयोः अनुप्रियम् एकम् अनुबध्नीत। 7x1=7

1) उपनिषच्छब्दार्थः।
2) यमेन दत्तः अतिरिक्तः वरः।

***

RKMVERI/DSP/MAIS/17-22/D2019/UT-1/SK-102

## SK-102 ईशमुण्डकोपनिषदौ सशाङ्करभाष्ये

लेखनाय कालः – होरा दिनाङ्कः – ५ आगस्तः २०१९

---

### A) यथानिर्देशं षड् उत्तरयत । १ x ६ = ६

1) एषणात्रयं किम्।
2) त्यक्तेन इत्यस्य त्यागेन इत्यर्थः कस्मात्।
3) "इमौ द्वावेव..." (श्लोकम् पूरयत)
4) "द्वाविमावथ..." (श्लोकम् पूरयत)
5) मातरिश्वा इत्यस्य कोऽर्थः।
6) परमात्मनः स्थूलशरीरत्वप्रतिषेधः काभ्यां शब्दाभ्यां कृतः।
7) वायुरनिलममृतम् – कोऽर्थः।
8) ईशावस्योपनिषत् कस्याः संहितायाः कतमोऽध्यायः।

### B) त्रीन् संक्षेपतो व्याख्यात ३ x ३ = ९

1) ईशा वास्यम् – कोऽर्थः।
2) कर्मनिष्ठाधिकारिणां कृते केवलं कर्म विहितम् उत समुच्चितम्। विशदीकुरुत।
3) के आत्महनः, कथञ्च त आत्महनः।
4) अनेजत्, मनसो जवीयः इत्यनयोः श्रुत्योर्विरोधः कथम् परिहृतः।
5) पुरुषशब्दस्य व्याख्यानत्रयं किम्।

### C) द्वावपि व्याख्यात । ५ x २ = १०

1) ईशोपनिषद्गतं द्विविधं समुच्चयानुष्ठानम् प्रतिपादयत। (श्लोकोद्धारो नावश्यकः)
2) ज्ञाननिष्ठां कर्मनिष्ठाञ्च स्वरूपफलाधिकारिश्रुतिवाक्यादिप्रदर्शनद्वारा पृथक्कुरुत।

***

**SK-103 छान्दोग्योपनिषद्भाष्यम्(6-8)**

Marks-25 Date- 07/08/2019

**A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x5=5**

1. षष्ठाध्यायस्य आरम्भहेतुः कः?
2. कीदृशः श्वेतकेतुः गृहमेयाय?
3. कस्मिन् मते अवयवातिरिक्तस्य अवयविनं नाङ्गीकुर्वन्ति?
4. कुतः न सतः उपचरितमेव ईक्षितृत्वम्?
5. भूतानां त्रीण्येव बीजानि, कानि तानि?
6. मायाशक्तेः विषयत्वेन आश्रयत्वेन च किं स्वीक्रियते?
7. अग्न्यादिभिः दृष्टान्तैः तेजस एव त्रिवृत्करणं दर्शितं कुतः?

**B) अल्पाक्षरेण व्याख्यात। 3x5=15**

1. येनाश्रुतं श्रुतं भवति.....।
2. यथा सोम्यैकेन मृत्पिण्डेन.....।
3. सदेव सोम्येदमग्र आसीत् ......।
4. तदैक्षत बहु स्यां प्रजायेयेति .....।
5. सेयं देवतैक्षत हन्ताहम्.....।
6. यदग्ने रोहितं रूपं तेजसः.....।

**C) लघुप्रबन्धं लिखत। 5x1=5**

1. सदेव सोम्येदमग्र आसीदिति मन्त्रतात्पर्यं निरूप्य एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञां यथाग्रन्थं साधयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/UT-1/SK-125

## SK-125 भगवद्गीतायाः २,३,४ अध्यायाः सशाङ्करभाष्याः

लेखनाय कालः – होरा     दिनाङ्कः – २९ जूलै २०१९

---

**A) षट् प्रश्नान् वाक्येनोत्तरत ।**     **१ x ६ = ६**

1) का साङ्ख्यबुद्धिः।
2) का योगबुद्धिः।
3) को धर्मः।
4) मात्रास्पर्शशब्दस्य प्रथमं व्याख्यानं किम्।
5) मात्रास्पर्शशब्दस्य द्वितीयं व्याख्यानं किम्।
6) का संख्यनिष्ठा।
7) का योगनिष्ठा।
8) युद्धकर्तव्यता श्रीभगवता कस्मान्न विधीयते।

**B) त्रीनुत्तरत।**     **३ x ३ = ९**

1) भगवद्गीताशास्त्रस्य अनुबन्धचतुष्टयम्।
2) “न हि शीतोष्णादि प्रमाणैर्निरूप्यमाणं वस्तुसद्भवति” – सप्रसङ्गं व्याख्यात।
3) “तदसत्त्वे सर्वाभावप्रसङ्ग इति चेन्न” – सप्रसङ्गं व्याख्यात।
4) “ननु आगमेनात्मा परिच्छिद्यते” – सप्रसङ्गं व्याख्यात।
5) प्राणिनां शोकमोहौ कथमुत्पद्येते, तयोः फलञ्च किम्।

**C) द्वावपि व्याख्यात ।**     **५ x २ = १०**

1) भगवदवतारं वर्णयत।
2) श्रौतस्मार्तकर्मसहिताज्ज्ञानादेव कैवल्यमिति मतं विरुद्ध्य प्रदर्शितान् हेतून् उल्लिखत।

***

RKMVERI/DSP/MAIS/16-21/D2019/UT-1/SK-132

## SK-132 ब्रह्मसूत्रभाष्यम्(I.3-4)

Marks-25 Date- 09/08/2019

---

### A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x5=5

1) द्युभ्वाद्यधिकरणे कति सूत्राणि सन्ति? एकमुदाहरत।
2) ब्रह्मसूत्रस्य तृतीयपादः किं प्रतिपादयितुम् आरभ्यते?
3) 'भेदव्यपदेशात्' इत्यत्र कः व्यपदेशः दर्शितः?
4) भूमाधिकरणस्य विषयवाक्यं किम्?
5) मुक्तोपसृप्यं किम्?
6) सम्प्रसादो नाम कः?
7) ईक्षतिकर्माधिकरणे पूर्वपक्षः कः?

### B) अल्पाक्षरेण व्याख्यात। 3x5=15

1) ईक्षतिकर्मव्यपदेशात्सः।
2) धर्मोपपत्तेश्च।
3) भूमा संप्रसादादध्युपदेशात्।
4) अन्यभावव्यावृत्तेश्च।
5) ईक्षतिकर्मव्यपदेशात्सः।
6) अक्षरमम्बरान्तधृतेः।

### C) लघुप्रबन्धं लिखत। 5x1=5

1) द्युभ्वाद्यधिकरणस्य तात्पर्यं तदधिकरणपठितसूत्राणां व्याख्यानपुरस्सरं सयुक्ति निरुपयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/UT-1/SK-133

## SK-133 ब्रह्मसूत्रभाष्ये स्मृत्यधिकरणात् भोक्त्रापत्यधिकरणं यावत्(२.१,२,३)

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन पदेन वा उत्तरत। 1x5=05**

1) मनोर्माहात्म्यं कया श्रुत्या अवगम्यते?
2) इतरेषां चानुपलब्धेः इत्यत्र इतरशब्देन के गृह्यन्ते?
3) त्रिरून्नतं स्थाप्य समं शरीरम् इत्यत्र केषामङ्गानामुन्नतता उक्ता?
4) श्रुतिरपि - "श्रोतव्यो मन्तव्यः"....... तर्कमप्यादर्तव्यं दर्शयति।(पूरयत।)
5) भोक्त्रापत्तेरविभागः इति सूत्रार्थं लिखत।
6) केन दृष्टान्तेन भोक्तृभोग्यविभागः सिद्धान्ते स्वीकृतः।
7) शिष्टापरिग्रहाः इत्यत्र विग्रहं प्रदर्शयत।

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) स्मृत्यधिकरणे पूर्वपक्षमालिखत।
2) योगप्रत्युक्त्यधिकरणं संगृह्णीत।
3) असदितिचेन्न प्रतिषेधमात्रत्वात् सूत्रार्थं विलिख्य भाष्यसारं लिखत।
4) अपीतौ तद्वत्प्रसंगादिति सूत्रोक्तं पूर्वपक्षं लिखत।
5) तर्कनिमित्तस्याक्षेपस्य बीजं तर्कस्य सापेक्षतां च गमयत।
6) तर्काप्रतिष्ठानादिति सूत्रार्थं विवृत्य केवलस्य तर्कस्याप्रयोजकतां गमयत।
7) न विलक्षणत्वादस्य तथात्वञ्च शब्दात् इति पूर्वपक्षसारं लिखत।

**C) द्वयोरेकं समाधत्त। 5x1=05**

1) स्मृत्यधिकरणसिद्धान्तमारचयत।
2) भोक्त्रापत्यधिकरणसिद्धान्तमारचयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/UT-1/SK-135

**SK-135 ब्रह्मसूत्रभाष्यम्**

Marks-25 | Date- 06/08/2019

---

**A) वाक्येन वाक्याभ्यां वा उत्तरत।** **1x5=5**

1) सन्ध्यं नाम किम्?
2) कास्मात्कारणात् जीवःतिरस्कृतज्ञानैश्वर्यो भवति?
3) सिद्धान्ते जीवस्य सुषुप्तिस्थानं किम्?
4) मुच्छावस्था न मरणे अन्तर्भवति, कुतः?
5) शरीरस्थस्य जीवस्य कति अवस्थाः भवन्ति? काः ताः?
6) न तावन्मुग्धो जागरितावस्थः, कुतः?

**B) अल्पाक्षरेण व्याख्यात।** **3x5=15**

1) निर्मातारं चैके पुत्रादयश्च।
2) सूचकश्च हि श्रुतेराचक्षते च तद्विदः।
3) अतः प्रबोधोऽस्मात्।
4) मुग्धेऽर्धसम्पत्तिः परिशेषात्।
5) देहयोगाद्वा सोऽपि।
6) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।

**C) लघुप्रबन्धं लिखत।** **5x1=5**

1) तदभावाधिकरणं व्याख्यात।

***

RKMVERI/DSP/MAIS/17-22/D2019/UT-1/SK-151

## SK-151 पञ्चदशी (१-५) प्रथमप्रकरणे अष्टचत्वारिंशत् श्लोकाः

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन पदेन वा उत्तरत।** **1x5=05**

1) मनः किम्?
2) सूक्ष्मशरीराभिमानिनः व्यष्टिरूपेण स्थितस्य चैतन्यस्य का संज्ञा?
3) ईश्वरः व्यष्टिरूपेण वर्तते न वा?
4) केभ्यः मनः उत्पद्यते?
5) जाग्रत्स्वप्नयोः कः भेदः?
6) पुत्राध्ययनशब्दश्रवणप्रतिबन्धकं किम्?
7) प्रकृतेः लक्षणं किम्?

**B) सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अवस्थात्रये संविदः एकरूपतां गमयत।
2) अविद्यायाः द्वैविध्यमुक्त्वा जीवेश्वरभेदं तदद्वारा गमयत।
3) पञ्चीकरणं पञ्चदशीदिशा व्याख्यात।
4) जीवाः कदा यथासुखं विश्राम्यन्ति सश्लोकं निरूपयत।
5) पञ्चकोशानामापातपरिचयं ददत।
6) भागत्यागलक्षणां यथापञ्चदशी विवृणुत।
7) तत् त्वं पदार्थयोर्विवेकं पञ्चदशीदिशा प्रतिपादयत।

**C) द्वयोरेकं समाधत्त।** **5x1=05**

1) मंगलश्लोकान् व्याख्यात।
2) सूक्ष्मशरीरोत्पत्तिं पञ्चदशीदिशा विवृणुत।

***

RKMVERI/DSP/MAIS/16-21/D2019/UT-1/SK-164

# SK-164 वेदान्तपरिभाषा

कालावधिः - होराद्वयम् पूर्णाङ्काः - 25

---

**A) एकेन वाक्येन पदेन वा उत्तरत। 1x5=05**

1) शक्तिः नाम का?
2) तात्पर्यलक्षणं किम्?
3) योग्यतालक्षणं किम्?
4) कीदृशं वाक्यं प्रमाणम्?
5) पशुप्राशस्त्याबाधात् योग्यता कस्मिन् वाक्ये?
6) वेदे तात्पर्यं कथमवधार्यते?
7) सिद्धान्तनये अपौरूषेयत्वं नाम किम्?
8) पञ्चपादिकाविवरणकर्ता कः?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) आकांक्षालक्षणं दलकृत्यञ्च लिखत।
2) आगमस्य पौरूषेयत्वापौरूषेयत्वाभ्यां द्वैविध्यं प्रकाशयत।
3) शक्तिः नाम का? तस्याः स्वरूपं वर्णयत।
4) वाक्यज्ञाने के हेतवः? आपातपरिचयं ददत।
5) वेदानां नित्यत्वं सप्रसंगं निराकुरुत।
6) लक्षणाबीजं किमिति ससन्दर्भं व्याख्यात।
7) वाजिनः आकांक्षा वैश्वदेवयागे कुतो न इति विचारयत।

**C) द्वयोरेकं समाधत्त। 5x1=05**

1) लक्षणात्रैविध्यं विचारयत।
2) तत्वमस्यादि स्थले लक्षणा अनभ्युपगमं यथाग्रन्थं दर्शयत।

***

RKMVERI/DSP/MAIS/15-20/J2019/UT-1/SK-167

# SK-167 सिद्धान्तलेशसंग्रहः

Marks-25 | Date- 05/08/2019

**A) वाक्येन वाक्याभ्यां वा उत्तरत।** **1x5=5**

1) सिद्धान्तलेशसंग्रहस्य संप्रदायप्राप्तं व्याख्यानं किम्?
2) शब्दात् निर्विचिकित्सं परोक्षज्ञानमेवोत्पद्यते, कस्य मते?
3) नियमविधेरुदाहरणं किम्?
4) अपूर्वविधिपक्षे भाष्यकारसम्मतिप्रदर्शकं वाक्यं किम्?
5) जगतः जन्मादित्रितयं प्रति कारणत्वमित्यत्र हेतुः कः?
6) ब्रह्मणः कीदृशमुपादानकारणत्वं सिद्धान्ते स्वीकृतम्?

**B) अल्पाक्षरेण व्याख्यात।** **3x5=15**

1) विवर्तपरिणामयोः लक्षणम्।
2) श्रवणविधिविचारे प्रकटार्थकारपक्षः।
3) वेदान्तश्रवणे परिसंख्याविधिविचारः।
4) विधित्रयस्य लक्षणविचारः।
5) ब्रह्मलक्षणविचारे कौमुदीकाराणां पक्षः।
6) श्रवणविधिविचारे वाचस्पतिमतम्।

**C) लघुप्रबन्धं लिखत।** **5x1=5**

1) श्रवणविधिविचारे नियमविधिं यथाग्रन्थं साधयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/UT-1/SK-171

## SK-171 अद्वैतसिद्धिः (आदितः द्वितीयमिथ्यात्वे पूर्वपक्षान्ता।)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 25

---

### A) एकेन वाक्येन पदेन वा उत्तरत। 1x5=5

1. अद्वैतसिद्धिः शब्दार्थः कः?
2. व्युदसनं नाम किम्?
3. पक्षतालक्षणं किम्?
4. पंचपादिकाकारमते मिथ्यात्वलक्षणं किम्?
5. शुक्तिरूप्ये सिद्धसाधनतावारणाय किं विशेषणम्?
6. विप्रतिपत्तिविषयता कस्मिन्?
7. द्वितीयमिथ्यात्वलक्षणं किम्?

### B) सप्तसु पञ्च समाधत्त। 3x5=15

1) प्राचीनपक्षतालक्षणं खण्डयित्वा नवीनं स्थापयत।
2) विप्रतिपत्तेर्विचारांगत्वं निराकुरुत।
3) मिथ्यात्वविषयिणीं विप्रतिपत्तिं प्रदर्श्य विशेषणानां सार्थक्यं निरूपयत।
4) सन्दिग्धानैकान्तिकता दोषलक्षणं ससन्दर्भं विचारयत।
5) व्याहतेस्त्रैविध्यमाशंक्य खण्डयत।
6) पक्षतावच्छेदकविचारमुपस्थापयत।
7) विप्रतिपत्तेः विचारांगत्वं साधयत।

### C) द्वयोरेकं समाधत्त। 5x1=05

1) प्रथममिथ्यात्वलक्षणे पूर्वपक्षं विलिख्य खण्डयत।
2) भेदाभेदवादिनः अनुमानं विचारयत।

***

RKMVERI/DSP/MAIS/17-22/D2019/UT-1/SK-205

## SK-205 वैयाकरणसिद्धान्तकौमुदी - 2

Time – One hour | Marks – 25

### A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत 1x6=6

1) प्रत्ययः इति कियत्पर्यन्तमधिकारः ?
2) सुपः इति सूत्रस्य वृत्तिः का ?
3) केषामेकशेषः भवति ?
4) एङ्ह्रस्वादिति सूत्रेण कस्य लोपः विहितः ?
5) केन कारणेन ऐस् इत्यस्य सर्वादेशः भवति ?
6) रामशब्दस्य पञ्चम्येकवचने कि रूपाणि ?
7) नुटागमः कस्य भवति ?
8) नामीति सूत्रेण कस्य दीर्घः भवति ?

### B) यथेष्टं त्रयाणां प्रशनानां उत्तरं लिखत 3x3=9

1) हे कतरत् इत्यत्र कुतो न लोपः ?
2) पदव्यवायेऽपि इति निषधं बाधितुमाङ्ग्रहणम्। विशदयत।
3) अतः एव सः सि इति तादेशः आरभ्यते। विशदयत।
4) रामौ। रूपं ससूत्रं साधयत।
5) रामेभ्यः। रूपं ससूत्रं साधयत।

### C) द्वयोः उत्तरं लिखत 5x2=10

1) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। वर्णयत।
2) ङ्याप्प्रातिपदिकात्। विवृणुत।
3) सरूपाणामेकशेष एकविभक्तौ। निरूपयत।

***

RKMVERI/DSP/MAIS/16-21/D2019//UT-1/SK-223

## SK-223 सिद्धान्तकौमुद्याम् अदादितः णिजन्तप्रकरणम्

कालावधिः - एकहोरा पूर्णाङ्काः- २५

---

**A) यथेष्टं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) अद्-धातोः लिटि प्रथमपुरुषे रूपाणि लिखत।
2) अद्-धातोः लुङि प्रथमपुरुषे रूपाणि लिखत।
3) अभ्यासाच्च इत्यस्य अर्थं लिखत।
4) अवधीत् इत्यत्र अतो हलादेर्लघोः इति वृद्धिः कुतो न?
5) स्फायन्निर्मोकसन्धिः इत्यत्र स्फायन् कथं सिद्ध्यति?
6) ऐड्ढ्वम् इत्यत्र इडागमः कुतो न भवति?
7) आस्-धातोः लिटि प्रथमपुरुषे रूपाणि लिखत।
8) शीङ्-धातोः लुङि उत्तमपुरुषे रूपाणि लिखत।
9) ऊर्णु-धातोः लङि प्रथमपुरुषे रूपाणि लिखत?
10) अभीयात् इत्यत्र एतेर्लिङि इति ह्रस्वः कुतो न भवति?
11) इङ्-धातोः लुङि प्रथमपुरुषे रूपाणि कानि?
12) ऊर्णु-धातोः लुङि पदद्वयेऽपि प्रथमपुरुषैकवचने कति रूपाणि? कानि तानि?

**B) यथाकामं पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) जक्षुः, अद्धि, अघसत् इति प्रयोगान् साधयत।
2) जघ्नुः, अद्विषुः, अधुक्षत् इति प्रयोगान् साधयत।
3) ऊर्णुनुवुः, अद्विक्षि, अदुग्ध इति प्रयोगान् साधयत।
4) हन्तेर्जः, वा लिटि इति सूत्रद्वयं व्याख्यात।
5) न न्द्राः संयोगादयः, तुरुस्तुशम्यमः सार्वधातुके इति सूत्रद्वयं व्याख्यात।

***

RKMVERI/DSP-WW/MAIS/16-21/D2019/UT-1/SK-223

## SK-223 सिद्धान्तकौमुद्याम् अदादितः णिजन्तप्रकरणम्

कालावधिः - एकहोरा　　　　　　　　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः- २५

---

**A) यथेष्टं दश प्रश्नाः समाधेयाः।　　　　　　　　　　　　　　　　　　　　　1x10=10**

1) अद्-धातोः लिटि प्रथमपुरुषे रूपाणि लिखत।
2) अद्-धातोः लुङि प्रथमपुरुषे रूपाणि लिखत।
3) अभ्यासाच्च इत्यस्य अर्थं लिखत।
4) अवधीत् इत्यत्र अतो हलादेर्लघोः इति वृद्धिः कुतो न?
5) स्फायन्निर्मोकसन्धिः इत्यत्र स्फायन् कथं सिद्ध्यति?
6) ऐड्ढ्वम् इत्यत्र इडागमः कुतो न भवति?
7) आस्-धातोः लिटि प्रथमपुरुषे रूपाणि लिखत।
8) शीङ्-धातोः लुङि उत्तमपुरुषे रूपाणि लिखत।
9) ऊर्णु-धातोः लङि प्रथमपुरुषे रूपाणि लिखत?
10) अभीयात् इत्यत्र एतेर्लिङि इति ह्रस्वः कुतो न भवति?
11) इङ्-धातोः लुङि प्रथमपुरुषे रूपाणि कानि?
12) ऊर्णु-धातोः लुङि पदद्वयेऽपि प्रथमपुरुषैकवचने कति रूपाणि? कानि तानि?

**B) यथाकामं पञ्चसु त्रीन् समाधत्त।　　　　　　　　　　　　　　　　　　　　　5x3=15**

1) जक्षुः, अद्धि, अघसत् इति प्रयोगान् साधयत।
2) जघ्नुः, अद्विषुः, अधुक्षत् इति प्रयोगान् साधयत।
3) ऊर्णुनुवुः, अद्विक्षि, अदुग्ध इति प्रयोगान् साधयत।
4) हन्तेर्जः, वा लिटि इति सूत्रद्वयं व्याख्यात।
5) न न्द्राः संयोगादयः, तुरुस्तुशम्यमः सार्वधातुके इति सूत्रद्वयं व्याख्यात।

***

## SK-241 महाभाष्ये 2 - 4 आह्निकानि

Time – One hour | Marks – 25

### A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत 1x6=6

1) धात्वादिस्थस्य अकारस्य विवृतोपदेशः किमर्थः ?
2) अनुबन्धसङ्करस्य परिहारः कः ?
3) अकारस्य आन्यभाव्यं कस्मात् ?
4) व्यक्तिपक्षेऽपि कथमकारस्य कार्याणि भवन्ति ?
5) के पुनः प्लुत्यादयः ?
6) प्लुत्यदिषु वार्तिकमते कः परिहारः ?
7) कृपो रो लः इति सूत्रस्य पदविभागः कथम् ?
8) अरवतः इत्युच्यते चेत् कुत्र दोषः ?

### B) यथेष्टं त्रयाणां प्रशनानां उत्तरं लिखत 3x3=9

1) अनुबन्धसङ्करस्तु। व्याख्यात।
2) एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्। विवृणुत।
3) रूपसामान्याद्वा। निरूपयत।
4) अशक्तिजानुकरणार्थः ऌकारोपदेशः इति प्रतिपादयत।
5) एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः। वर्णयत।

### C) यथेष्टं द्वयोः उत्तरं लिखत 5x2=10

1) अक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्र किमर्थं विवृतोपदेशः कर्तव्यः ?
2) व्यक्तिपक्षे कथमकारस्येकत्वम्। प्रतिपादयत।
3) यदृच्छाशब्दार्थम् ऌकारः इति पक्षं निरूप्य खण्डयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/UT-1/SK-255

## SK-255 परिभाषेन्दुशेखरे 1 तः 50 परिभाषां यावद्

कालावधिः - एकहोरा पूर्णाङ्काः- 25

---

**D) यथेष्टं पञ्च प्रश्नाः समाधेयाः।** **1x5=5**

1) यथाश्रुतग्राहिप्रतिपत्रपेक्ष इत्यस्य विग्रहं लिखत ।
2) यथा प्रदीपः सुप्रज्वलितः सर्वं ... इति क्व सूत्रभाष्ये विद्यते ?
3) संज्ञाशास्त्राणां कार्यकालपक्षे क्व वाक्यार्थबोधो भवति ?
4) ददातिदधात्योर्विभाषा इत्यनेन का परिभाषा ज्ञाप्यते?
5) सर्वे सर्वार्थवाचकाः इत्यभुपगमः कस्य दृष्ट्या?
6) षष्ठी स्थाने योगा इत्यस्य आवृतस्य द्वितीयस्य को अर्थः?

**E) यथाकामं द्वयं समाधत्त।** **10x2=20**

1) यथोद्देशपक्षस्य व्याख्यानं यथाग्रन्थं कुरु।
2) अनुबन्धानाम् अनेकान्तपक्षं निरस्य एकान्तपक्षं साधयत?
3) यदागमपरिभाषां व्याख्यात।

***

RKMVERI/DSP/MAIS/15-20/D2019/UT-1/SK-273

## SK-273 भूषणसार 2

Time – One hour Marks – 25

---

**A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत- 1x6=6**

1) भूषणसाररीत्या समासः कति विधः ?
2) सुपां तिङा समासस्योदाहरणमेकं लिखत ?
3) प्राचीनानां मते तत्पुरुषत्वं नाम किम् ?
4) पदोद्देश्यकविधित्वं केष्वस्ति ?
5) जहत्स्वार्था नाम का ?
6) भेदः वाच्यः इति पक्षे राजपुरुषः इत्यत्र शाब्दबोधः कः ?
7) प्राप्तोदकः इत्यस्य शाब्दबोधः कः ?
8) व्यपेक्षावादिनां मते कुत्र व्युत्पत्त्यन्तरकल्पना अपेक्षिता ?

**B) यथेष्टं त्रयाणां उत्तरं लिखत** 3x3=9

1) समासस्तु चतुर्थेति कुतः प्रायोवादः ?
2) अजहत्स्वार्थपक्षः कः ?
3) वृत्तेस्त्रिविधभेदाः के ?
4) पङ्कजशब्दवदित्यस्य कोऽर्थः ?
5) बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवम्। विशदयत।

**C) द्वयोः उत्तरं लिखत** 5x2=10

1) समासस्य षट्भेदाः।
2) वृत्तिभेदाः।
3) प्राप्तोदकः इत्यत्र व्यपेक्षावादिमते दोषाः।

***

## SK-281 वाक्यपदीय

Time – One hour | Marks – 25

### A) यथेष्टं षण्णाम् एकेन वाक्येन उत्तरं लिखत 1x6=6

1) अर्थभावेन कः विवर्तते ?
2) ब्रह्मणः अनुकारः कः ?
3) तपसामुत्तमं तपः किम् ?
4) तत्त्वावबोधः शब्दानां कस्मात् ?
5) अत्रातीतविपर्यासः केवलामनुपश्यति। कुत्र ?
6) शब्दार्थसम्बन्धः कीदृशः ?
7) शब्दस्य भेदद्वयं किम् ?
8) सम्बन्धस्य भेदद्वयं किम् ?

### B) यथेष्टं त्रयाणां उत्तरं लिखत 3x3=9

1) अध्याहिकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः।।
2) भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते।।
3) आसन्नं ब्रह्मणः तस्य तपसामुत्तमं तपः।
प्रथमं च्छन्दसामङ्गमाहुर्व्याकरणं बुधाः।।
4) इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।
5) नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।

**C) द्वयोः उत्तरं लिखत** 5x2=10

1) शब्दब्रह्मणः स्वरूपं वर्णयत।

2) वेदस्य सर्वमूलत्वं वर्णयत।

3) शब्दार्थयोः भेदद्वयं विवृणुत।

***

RKMVERI/DSP/MAIS/16-21/UT-1/D2019/SK-311

# SK-311 अर्थसंग्रहः

Marks-25 Date- 10/08/2019

---

## A) वाक्येन वाक्याभ्यां वा उत्तरत। 1x5=5

1) "चोदनेति क्रियायाः प्रवर्तकवचनमाहुः" कुत्र प्रोक्तम् ?
2) जैमिनिप्रोक्तं धर्मलक्षणं किम्?
3) 'जिज्ञासा पदस्य विचारे लक्षणा' कुतः?
4) पूर्वमीमांसकानां मते शब्दार्थः कः?
5) किं नाम अङ्गत्वम्?
6) उत्पत्तिविधौ धात्वर्थस्य कथमन्वयः?
7) "संख्यादीनामयोग्यत्वात् न साध्यत्वेनान्वयः" इत्यत्र अयोग्यत्वं नाम किम्?

## B) अल्पाक्षरेण व्याख्यात। 3x5=15

1) धर्मलक्षणम्।
2) शाब्दीभावनायाः परिचयः।
3) आर्थीभावनाया अंशत्रयम्।
4) उत्पत्तिविधिः।
5) विशिष्टविधौ वाक्यभेददोषपरिहारः।
6) विनियोगविधिः।
7) श्रुतिप्रमाणम्।

## C) लघुप्रबन्धं लिखत। 5x1=5

1) "सोमेन यजेत" इत्यत्र विशिष्टविधिविचारं यथाग्रन्थं कुरुत।

***

RKMVERI/DSP-WW/MAIS/16-21/D2019/UT-1/SK-311

## SK-311 अर्थसंग्रहः

कालावधिः - एकहोरा | पूर्णाङ्काः - 25

---

**A) सप्तसु पञ्चैव समाधेया : 5x1=5**

1) मीमांसासूत्रस्य रचयिता कः?
2) अर्थसंग्रहग्रन्थस्य विषयः कः?
3) अर्थसंग्रहग्रन्थस्य अनुबन्धचतुष्टयं विवृणुत।
4) वेदाध्ययनस्य दृष्टं फलं किम्?
5) 'स्वाध्यायोऽध्येतव्यः' इति विधिवाक्यं वेदे कुत्र वर्तते?
6) अर्थसंग्रहग्रन्थस्य नामकरणे किं तात्पर्यम?
7) भावनायाः को भेदः?

**B) चतुर्षु द्वयं समाधत्त : 5x2=10**

1) मीमांसाशब्दस्य कोऽर्थः?
2) "स्वाध्यायोऽध्येतव्यः" इति विधिवाक्यं वेदे कुत्र अस्ति?
3) विधिः कतिविधा?
4) का नाम भावना?

**C) द्वयो एकं समाधत्त : 10x1=10**

1) को नाम धर्मः? अर्थसंग्रहग्रन्थमवलम्ब्य धर्मलक्षणं विशदं व्याख्यायताम्।
2) 'अथातो धर्मजिज्ञासा' इति सूत्रे अथशव्दः कथं सन्निविष्टः? जिज्ञासेति पदस्य कोऽर्थः? धर्मजिज्ञासा कथं क्रियते?

RKMVERI/DSP/MAIS/19-24/D2019/UT-1/SK-521

## SK-521 संस्कृतभाषाप्रवेशः।

लेखनाय कालः – होरा दिनाङ्कः – १६ आगस्तः २०१९

---

**A) एतेषु अभीष्टानि त्रीणि वाक्यनि क्त-प्रत्यययोगेन भवन्तः परिवर्तयन्तु। १ x ३ = ३**

1) नृपतिः प्रबलम् अरिम् अजयत्।
2) शारदा रम्यां कविताम् अलिखत्।
3) बुद्धिमान् ऋषिः प्रखरम् अग्निम् प्राशंसत्।
4) श्रद्धालुः जनः देवताम् अपूजयत्।
5) माता उमा काञ्चीम् अगच्छत्।

**B) एतेषु अभीष्टानि त्रीणि वाक्यानि क्तवतु-प्रत्यययोगेन भवन्तः परिवर्तयन्तु। १ x ३ = ३**

1) प्रचण्डः अग्निः आहुतिम् अनयत्।
2) मेधावी मनुष्यः देवम् अनमत्।
3) चण्डिका अशुभम् अनाशयत्।
4) दुर्गा सभायाम् अभाषत।
5) फलानि भूतले अपतन्।

**C) एतेषु अभीष्टान् चतुरः श्लोकान् भवन्तः पूरयन्तु। १ x ४ = ४**

1) रमा रुचिर्नदी...॥
2) प्रपरापसमन्वव...॥
3) सन्-क्यच्-काम्यच्...॥
4) वर्तमाने परोक्षे...॥
5) ह्योभूते प्रेरणादौ...॥
6) लट् वर्तमाने...॥
7) लज्जा सत्ता...॥

**D) यथेच्छं चतुरः प्रश्नान् भवन्तः समादधतु। १.५ x ४ = ६**

1) गोशब्दस्य **द्वितीयायां षष्ठ्यां सप्तम्याञ्च** विभक्तौ रूपाणि भवन्तो लिखन्तु।
2) जलधिशब्दस्य **प्रथमायां द्वितीयायां षष्ठ्याञ्च** विभक्तौ रूपाणि भवन्तः लिखन्तु।

3) पितृशब्दस्य **प्रथमायां षष्ठ्यां सप्तम्याञ्च** विभक्तौ रूपाणि भवन्तो लिखन्तु।
4) धरणीशब्दस्य **प्रथमायां द्वितीयायां तृतीयायाञ्च** विभक्तौ रूपाणि लिखन्तु भवन्तः।
5) तच्छब्दस्य (तत्-शब्दस्य) **पुंलिङ्गे प्रथमायां द्वितीयायां पञ्चम्याञ्च** विभक्तौ रूपाणि लिखन्तु।
6) अदस्-शब्दस्य **स्त्रीलिङ्गे प्रथमायां द्वितीयायां षष्ठ्याञ्च** विभक्तौ रूपाणि लिखन्तु भवन्तः।
7) इदम्-शब्दस्य **नपुंसकलिङ्गे प्रथमायां तृतीयायां सप्तम्याञ्च** विभक्तौ रूपाणि लिखन्तु।

**E) केषाञ्चित् पञ्चानाम् प्रश्नानाम् उत्तरम् भवन्तः प्रयच्छन्तु। १ x ५ = ५**

1) “सदैव पुरतो निधेहि…” इत्यादिगीतात् कानिचन चत्वारि **अव्ययपदानि** यूयं लिखत।
2) “सदैव पुरतो निधेहि…” इत्यादिगीतात् कानिचन चत्वारि **तिङन्तपदानि** यूयं लिखत।
3) “कल्ये बुद्ध्यति…“ इत्यादिगीतात् कानिचन चत्वारि **अव्ययपदानि** यूयं लिखत।
4) दा-धातोः कर्तरि लटि सर्वाणि रूपाणि यूयं लिखत।
5) कृ-धातोः **कर्मणि** लोटि सर्वाणि रूपाणि लिखत।
6) दीप्-धातोः कर्तरि विधिलिङि सर्वाणि रूपाणि लिखत।
7) सेव्-धातोः **कर्मणि** लङि सर्वाणि रूपाणि लिखत।
8) क्री-धातोः कर्तरि लङि सर्वाणि रूपाणि लिखत।

**F) कानिचन चत्वारि वाक्यानि भवन्तः संशोध्य लिखन्तु। ०.५ x ४ = २**

1) मात्रा गीतं गायति।*
2) मन्दिरे सर्वाः जनाः भगवतं ध्यायति।*
3) सः शिशुः उद्याने भगिनीं सह पुष्पाणि चिनुतः।*
4) भगवति गङ्गा हिमालयः पर्वतात् प्रवहति।*

5) दशरथपुत्र  रामः वनं गम्यते।*

6) मम उदरे महती व्यथा भूयते।*

7) तेन बालकेन प्रातःकाले भोजनं कुरुते।*

**G) कयोश्चित् द्वयोः वाक्ययोः प्रयोगम् भवन्तः परिवर्तयन्तु।** **१ x २ = २**

1) एते सर्वे पुरुषाः रामं मर्यादापुरुषं वन्दन्ते।

2) सर्वाः ताः महिलाः तासाम् पितरं सेवन्ते।

3) प्रतिदिनम् अहम् प्रातःकाले त्वाम् प्रणमामि।

4) सैनिकाः सर्वदा अस्माकं देशं रक्षन्ति।

5) आकाशे मेघं दृष्ट्वा मयूराः नृत्यन्ति।

***